CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१५२

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आ० ॥ श्रीगणेशायनमः ॥ श्रीदक्षिणामूर्तये । ततो युद्धपरिश्रांतं समरे चिंतयास्थितं ॥ रावणं चाग्रतो
॥१॥ दृष्ट्वा युद्धाय समुपस्थितं ॥१॥ दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणं ॥ उपागम्याब्रवीद्राममग-
स्त्यो भगवांनृषिः ॥२॥ राम राम महाबाहो शृणु गुह्यं सनातनं ॥ येन सर्वानरीन्वत्स समरे विज-
यिष्यसि ॥३॥ आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनं ॥ जयावहं जपेन्नित्यमक्षय्यं परमं शिवं
॥४॥ सर्वमंगलमांगल्यं सर्वपापप्रणाशनं ॥ चिंताशोकप्रशमनमायुर्वर्धनमुत्तमं ॥५॥ रश्मिमं-
तं समुद्यंतं देवासुरनमस्कृतं ॥ पूजयस्व विवस्वंतं भास्करं भुवनेश्वरं ॥६॥ सर्वदेवात्मको ह्येष तेज-
स्वी रश्मिभावनः ॥ एष देवासुरगणाँल्लोकान्पाति गभस्तिभिः ॥ एष ब्रह्मा च विष्णुश्च शिवः स्कं- ॥राम॥
दः प्रजापतिः ॥ महेंद्रो धनदः कालो यमः सोमो ह्यपां पतिः ॥८॥ पितरो वसवः साध्या ह्यश्विनौ म ॥१॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ।
वायुर्वन्हिः प्रजाः प्राणाः ऋतुकर्ता प्रभाकरः ॥१०॥ हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान्
तिमिरोन्मथनः शंभुस्त्वष्टा मार्तंडकोंऽशुमान् ॥११॥ हिरण्यगर्भः शिशिरस्तपनो हस्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शंखः शिशिरनाशनः ॥१२॥ व्योमनाथस्तमोभेदी ऋग्यजुःसामपा-
रगः घनवृष्टिरपां मित्रो विंध्यवीथीप्लवंगमः ॥१३॥ आतपी मंडली मृत्युः पिंगलः सर्व-
तापनः ॥ कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥१४॥ नक्षत्रग्रहताराणामधिपो विश्व-
भावनः ॥ तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते ॥१५॥ नमः पूर्वाय गिरये पश्चिमायाद्रये
नमः ॥ जयाय जयभद्राय हर्यश्वाय नमो नमः ॥१६॥ नमो नमः सहस्रांशो आदित्याय नम-
मो नमः ॥ नम उग्राय वीराय सारंगाय नमो नमः ॥१७॥ नमः पद्मप्रबोधाय प्रचंडाय नमो
०ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आ॰ ॥ स्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ अस्मिन्क्षणे महाबाहो रावणं त्वं जहिष्यसि ए
॥२॥ वमुक्त्वा ततोऽगस्त्यो जगाम स यथागतं ॥२७॥ एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ॥ धा
रयामास सुप्रीतो राघवः प्रयतात्मवान् ॥२८॥ आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान्
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥२९॥ रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपा
गमत् सर्वयत्नेन महतावृतो तस्य वधेऽभवत् ॥३०॥ अथ रविरवदन्निरीक्ष्य रामं मुदितहृदं मनाः
परमं प्रहृष्यमाणः ॥ निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥३१॥ इत्या ॥ राम ॥
र्षे श्रीमद्रामायणे वाल्मीकीये युद्धकांडे आदित्यहृदयं संपूर्णम् शुभं भूयात् ॥ ॥ ॥३॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi